ॐ

શ્રી સંતરામ મહારાજ સત્ય છે

# પ્રાતઃ સ્મૃતિકા

## શ્રી સંતરામ મંદિર, નડીઆદ

- સહયોગ : સ્વ. ભીખુભાઈ બેચરભાઈ પટેલ,
  (સારસા - New Jersey)
  ના સ્મણાર્થે તેમના પરિવાર તરફથી
- પ્રકાશક : શ્રી સંતરામ ભક્ત સજ્માજ, U.S.A.
- પ્રકાશન : માઘ પૂર્ણિમા, સંવત ૨૦૬૭
- પ્રત : ૧૦૦૦ નંગ
- મુદ્રક : વિમલ ગ્રાફિક્સ, નડીઆદ

# શ્રી સંતરામ ભક્ત સમાજ, યુ.એસ.એ.

P. O. Box 32155
Newark, New Jersey 07102
Phone : **(732) 906 - 0792**
Fax : **(908) 486 - 6082**
Website: **www.santram.org**
Email: **info@santram.org**

॥ શ્રી સંતરામ મહારાજ સત્ય છે ॥

## યોગિરાજ અવધૂત શ્રી સંતરામ મહારાજની દિવ્ય અખંડ જ્યોતિના શુભાષિર્વાદ

માનવજન્મ દુર્લભ છે. માનવીમાં બુદ્ધિતત્ત્વનું મહત્ત્વ છે, તેની મદદથી જ્ઞાનની પ્રાપ્તિ, માનવ ગુણોનો વિકાસ થાય છે. જીવન નિયમમાં, સતત આત્મવિકાસમાં ગતિ કરે તો, આત્મશોધન દ્વારા તે ભીતર-બાહ્ય પરમાત્માની પ્રાપ્તિ કરી શકે છે.

નિયમના જીવનમાં સ્નાન, પૂજા, જપ, ધ્યાન મહત્ત્વના છે. એ દ્વારા સજાગતા, એકાગ્રતા પ્રાપ્ત થાય છે. એકાંતમાં પાઠ,

કરવામાં આવે તો અંતર અનુભૂતિ થાય છે. આ અંતરની અનુભૂતિ એ જ પ્રભુકૃપા છે. આરાધના ઉપાસનાથી ઈશ્વરાનુભૂતિ થાય છે.

**સ્વ. ભીખુભાઈ બેચરભાઈ પટેલ (સારસા-New Jersey),** ના સ્મણાર્થે તેમના પરિવાર તરફથી શ્રી સંતરામ ભક્ત સમાજ-યુ.એસ.એ.નાં મહાપૂર્ણિમા સત્સંગ પર્વે **'પ્રાતઃ સ્મૃતિકા'** નું પ્રકાશન સૌને માટે પ્રેરણાદાયી બને. યોગીરાજ અવધૂત શ્રી સંતરામ મહારાજ ની દિવ્ય અખંડ જ્યોતિના શુભાશિર્વાદ સહુને પ્રાપ્ત થાય તેવા આશીર્વાદ....

रामदास ।

**ફેબ્રુઆરી, ૧૮, ૨૦૧૧** **મહંતશ્રી સંતરામ મંદિર, નડીઆદ.**

# અનુક્રમણિકા


| અ.નં. | | પા.નં. |
| --- | --- | --- |
| ૧. | શ્રી ગણેશ સ્તોત્રમ્ | ૧૦ |
| ૨. | શ્રી દ્વાદશ જ્યોતિર્લિંગ સ્તોત્રમ્ | ૧૨ |
| ૩. | શ્રી સંતરામ સ્તોત્ર પંચકમ્ | ૧૩ |
| ૪. | શ્રી સંતરામ સ્તોત્રમ્ | ૨૮ |
| ૫. | શ્રી સંતરામાષ્ટકમ્ | ૩૪ |
| ૬. | શ્રી સંતરામ ગુરુ પંચક સ્તોત્રમ્ | ૩૯ |

| | | |
|---|---|---|
| ૭. | શ્રી સંતરામ પ્રાતઃ સ્મરણં સ્તોત્રમ્ | ૪૨ |
| ૮. | શ્રી ગુરુપાદુકા સ્તવન | ૪૪ |
| ૯. | કનકધારા સ્તોત્રમ્ | ૪૭ |
| ૧૦. | શ્રી સંતરામ સંકટ હરણ સ્રોત્રમ્ | ૫૭ |
| ૧૧. | શ્રી વિષ્ણુસહસ્ત્ર નામસ્તોત્રમ્ | ૬૨ |
| ૧૨. | શિવમહિમ્ન સ્તોત્રમ્ | ૧૦૬ |
| ૧૩. | શ્રી રુદ્રાષ્ટક | ૧૨૮ |
| ૧૪. | શ્રી ગોવિન્દાષ્ટકમ્ | ૧૩૦ |

| | |
|---|---|
| ૧૫. શ્રી સરસ્વતી સ્તોત્રમ્ | ૧૩૫ |
| ૧૬. શ્રી રામરક્ષા સ્તોત્રમ્ | ૧૩૬ |
| ૧૭. શ્રી રામનામ  માલા | ૧૪૮ |
| ૧૮. દત્તબાવની | ૧૫૨ |
| ૧૯. શ્રી સંતરામ નારાયણ ચાલીસા | ૧૬૦ |
| ૨૦. શ્રી હનુમાન ચાલીસા | ૧૬૬ |
| ૨૧. શ્રી ગુરુ કવચ | ૧૭૨ |
| ૨૨. રામ રક્ષા | ૧૭૫ |

| | |
|---|---|
| ૨૩. શ્રી યમુનાષ્ટકમ | ૧૭૮ |
| ૨૪. શ્રી ગોવિંદ દામોદર સ્તોત્રમ્ | ૧૮૩ |
| ૨૫. શ્રી કૃષ્ણમાલા | ૧૮૬ |
| ૨૬. કાકભુશુણ્ડિ રામાયણ | ૧૯૨ |
| ૨૭. શ્રી રામ સ્તુતિ | ૨૦૨ |
| ૨૮. આનંદ મંગળ આરતી | ૨૦૪ |
| ૨૯. કથા વિસર્જન | ૨૦૫ |
| ૩૦. પૂર્ણમિદં | ૨૦૭ |

# શ્રી ગણેશ સ્તોત્રમ્

વક્રતુંડ મહાકાય સૂર્ય કોટી સમપ્રભ
નિર્વિઘ્નં કુરુ મે દેવ શુભકાર્યેષુ સર્વદા (૧)

સુમુખશ્ચૈકદંતશ્ચ કપિલો ગજ કર્ણકઃ
લંબોદરશ્ચ વિકટો વિઘ્નનાશો વિનાયકઃ (૨)

ધૂમ્રકેતુઃ ગણાધ્યક્ષો ભાલચંદ્રો ગજાનનઃ
દ્વાદશૈતાનિ નામાનિ યઃ પઠેત્ શ્રૃણુયાદપિ (૩)

વિદ્યારંભે વિવાહે ચ પ્રવેશે નિર્ગમે તથા
સંગ્રામે સંકટેશ્ચૈવ વિઘ્નસ્તસ્ય ન જાયતે (૪)

શુક્લાંબર ધરં દેવં શશિવર્ણં ચતુર્ભુજં
પ્રસન્નવદનં ધ્યાયેત્ સર્વ વિઘ્નોપશાન્તયે (૫)

જપન્ ગણપતિ સ્તોત્રં ષડ્ભિર્માસૈઃ ફલંલભેત્
સંવત્સરેણ સિદ્ધિં ચ લભતે નાત્ર સંશયઃ (૬)

## ૧૨

# દ્વાદશ જ્યોતિર્લિંગ સ્તોત્રમ્

સૌરાષ્ટ્રે સોમનાથં ચ શ્રીશૈલે મલ્લિકાર્જુનમ્ ।
ઉજ્જયિન્યાં મહાકાલમોંકાર મમલેશ્વરમ્ ॥
પરલ્યાં વૈજનાથં ચ ડાકિન્યાં ભીમશંકરમ્ ।
સેતુબંધે તુ રામેશં નાગેશં ઘરુકાવને ॥
વારાણસ્યાં તુ વિશ્વેશં ત્ર્યંબકં ગૌતમી તટે ।
હિમાલયે તુ કેદારં ધૃષ્ણેશં તુ શિવાલયે ॥
એતાનિ જ્યોતિર્લિંગાનિ સાયં પ્રાતઃ પઠેન્નરઃ ।
સપ્ત જન્મ કૃતં પાપં સ્મરણેન વિનશ્યતિ ॥

## શ્રી સંતરામ સદ્ગુરુ વિજયતેતરામ્

## ૐ શ્રી સંતરામ સ્તોત્ર પંચકમ્

યેનાયં ખલુ સંતરામ વપુષા યોગશ્ચ વિસ્તારિતો ॥
યેનાપ્યત્ર ચ નાશિતં ભવભયં શ્રી લક્ષ્મણોદર્પહૃત્ ॥
અજ્ઞાનં ચ નિહત્ય વેદવચસા દીપ પ્રકાશઃ કૃતઃ ॥
તં નૌમિ પ્રતિ પાલકં શરણદં દત્તં હરિં પ્રાંજલિઃ ॥
માઘસ્ય પૂર્ણમાસ્યં યો દર્શનં ચ કરિષ્યતિ ॥
ઈહ કીર્તિં પ્રતિષ્ઠાં ચ પુત્ર પૌત્રાદિ સંતતિમ્ ॥
પ્રાપ્ય ચાતુલ ભોગાદિનંતે વિષ્ણુપરં વ્રજેત્ ॥

# શ્રી સંતરામ સદ્ગુરુ વિજયતેતરામ્

## મંગલમ્

બ્રહ્માનંદં પરમસુખદં કેવલં જ્ઞાનમૂર્તિં,
દ્વન્દ્વાતીતં ગગનસદૃશં તત્ત્વમસ્યાદિ લક્ષ્યમ્;
એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતમ્,
ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરૂં તં નમામિ. ૧

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુ, ગુરુર્દેવો મહેશ્વરઃ,
ગુરુરેવ પરંબ્રહ્મ તસ્મૈ શ્રી ગુરવે નમઃ. ૨

મન્નાથઃ શ્રી જગન્નાથો મદ્ગુરુઃ શ્રી જગદ્ગુરુઃ,
મમાત્મા સર્વભૂતાત્મા તસ્મૈ શ્રી ગુરવે નમઃ. ૩

ધ્યાનમૂલં ગુરોર્મૂર્તિઃ પૂજામૂલં ગુરોઃ પદં,
મંત્રમૂલં ગુરોર્વાક્યં મોક્ષમૂલં ગુરોઃ કૃપા. ૪

સપ્તસાગર પર્યન્તં તીર્થસ્નાનફલં સદા,
ગુરુપાદોદકસ્યાપિ સહસ્ત્રાંશેન દુર્લભમ્. ૫
ગુરુરેવ જગત્સર્વં બ્રહ્મવિષ્ણુ શિવાત્મકમ્,
ગુરોઃ પરતરં નાસ્તિ તસ્માત્સંપૂજયેદ્ ગુરુમ્. ૬
આનંદમાનન્દકરં પ્રસન્નં જ્ઞાનસ્વરૂપં નિજબોધયુક્તમ્,
યોગીન્દ્રમીડયં ભવરોગવૈદ્યં શ્રીમદ્‌ગુરું નિત્યમહં નમામિ.

## ॥ શ્રી સંતરામ સ્તોત્રમ્ ॥

શ્રુત્વા સ ચ ગુરોર્વાક્યં લક્ષ્મણો હૃષ્ટમાનસઃ,
દંડવત્ પ્રણિપત્યાહ આનંદાશ્રુપરિપ્લુતઃ.

### ॥ શ્રી લક્ષ્મણ ઉવાચ ॥

યોગિવ્યૂહૈકવંદ્યં પ્રથિતમપિ ગુણૈઃ સેવિતં લોકસંઘૈઃ,
દત્તાત્રેયાવતારં કલિયુગજજનેભ્યો વદંતં સુયોગં;
તિષ્ઠંતં સિદ્ધિયુક્તં મુનિગણનમિતં પાર્થિવૈર્વંદ્યમાનં,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૧

મેઘશ્યામં સુનેત્રં વિદિતપરશિવં ભાસયંતં સ્વકાંત્યા,
ત્રૈલોક્યં વિશ્વમેતત્ સુરવરમુનિભિઃ પ્રાર્થ્યમાનં યદંગં;
શ્વેતૈઃ કાષાયવસ્ત્રૈઃ સુબહુગુણગણૈર્ગુંફિતં બ્રહ્મરૂપં,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૨

સિંહસ્કંધં સુપાદં ત્રિવલિભિરૂદરં શોભિતં યસ્ય પૂર્ણં,
સ્વચ્છંપદ્માસનસ્થં ગુણતમપિપરં તારમાદ્યં સનાદં;
નાસાગ્રે બદ્ધદૃષ્ટિં સ્થિતમપિ ચ મહા બ્રહ્મણિ ભ્રાજમાનં,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૩

ભિત્વા ષટ્ ચક્રમાર્ગં ગહનમપિ પરં યોગિભિશ્ચાપ્યગમ્યં
લક્ષ્યે રૂપે કૃતૈક્યં સ્તવનગુણભયં સંસ્તુતં દેવસંઘૈઃ;
યસ્યાગ્રે સિદ્ધયોઽષ્ટૌ હરિદમલગૃહા દાગતારક્તવંત્યઃ,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૪

યસ્ય શ્રી સિદ્ધસેવ્યઃ સુરનરસુખદઃ સુપ્રસન્નઃ સુરમ્યઃ,
યુક્તૈઃ શ્વેતૈર્ધ્વજૈર્વૈ સુસુખજલયુતો યોગિભિઃ સેવનીયઃ;
શોભાઢયો દીપયુક્તો જનહિતકલયો યોગયોગ્યો મઠોવૈ,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૫

યત્સંગાન્નષ્ટપાપઃ સપદિ મમ ગતં ઘોરમજ્ઞાનમૂલં,
માયામોહૌ તથા મે સપદિ વિગલિતૌ નષ્ટસંદેહવૃત્તિઃ
વૈરાગ્યં ભક્તિયુક્તં ભજનસુખકરં સુપ્રસન્નં મનો મે,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૬

યત્સંગંપ્રાપ્તશિષ્યાઃ શમદમસહિતા યોગમાર્ગૈકનિષ્ઠાઃ,
વેદ્યં વેદાંતગમ્યં રહસિ પરશિવં શુદ્ધબોધૈકરૂપં;
જ્ઞાત્વાત્માનં ચ સર્વે ગુરુગતમનસો યોગનિષ્ઠા બભૂવુઃ,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૭

ગેહે વાદિત્રઘોષા વિનતબહુજના યસ્ય નિત્યં ભવંતિ,
દુઃખઘ્નો યત્ર વાતિ પ્રણતજનમનો લ્હાદકારી ચ વાયુઃ;
યં પ્રાપ્યાહં વિમૂઢો વિગતભવભયો જાતસચ્ચિત્સ્વરૂપઃ,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૮
ત્વં મે માતા પિતા મે સ્વજન કુલ કુટુંબં ચ બન્ધુસ્ત્વમેવ,
યેનાતોઽજ્ઞાનબંધઃ સપદિપરશુના તીવ્રવેગેન છિન્નઃ;
તસ્માત્તુભ્યં નમસ્તે શરણગતજન ક્લેશહંતાસિભોત્વં,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે. ૯

અન્નાદ્યૈઃ પંચકોશૈઃ રહિતપરશિવં પૂર્ણભક્ત્યા ગૃણંતં,
યોગીદ્રૈંશ્ચાપિ વંદ્યૈ ચ ભવભયહરૈ સ્તત્ત્વમસ્યાદિ વાક્યૈઃ;
શિષ્યાન્સંબોધયંતં નરકભયહરં લક્ષણૈક્યત્વમાદ્યં,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે.૧૦

પ્રજ્ઞાનં બ્રહ્મરૂપં શ્રુતિશતપઠિતં સચ્ચિદાનંદરૂપં,
કલેશાતીતં કજેશાદિભિરપિ સતતં પ્રાર્થ્યમાનં સુરેશૈઃ;
ચૈતન્યં શિષ્યમધ્યે નિગમગતિગિરા કથ્યતે યદ્ બ્રુવંતં,
શાંતં શ્રી સંતરામં પ્રણતજનમનોઽભીષ્ટદં નિત્યમીડે.૧૧

શોભાઢ્યાચ્છ્રીમહેશાત્ પ્રતિચિદિશિગતં મંદિરંભાતિ યસ્ય,
વિપ્રાદ્યૈશ્ચાપિ યુક્તાચ્છ્તપથનિપુણાત્ પત્તનાત્નષ્ટ સંજ્ઞાત્;
કાષ્ટાવાચ્યાં વસંતં સુરનરમુનિભિઃ સેવનીયં શુભાંગં,
શાંતં શ્રી સંતરામં પ્રણતજનમનોડભીષ્ટદં નિત્યમીડે.૧૨
એવં સ્તુત્વા ગુરુર્ભક્ત્યા લક્ષ્મણઃ પ્રીતમાનસઃ,
વિરરામ ગુરોરગ્રે બ્રહ્માનંદં ગતો યથા. ૧૩
દૃષ્ટ્વા ચૈતાદૃશં શિષ્યં સ યોગિસિદ્ધસમ્મતઃ,
ઉવાચ પ્રીતિયુક્તેન વાક્યેન હર્ષયન્નિવ. ૧૪

## ॥ શ્રી સંતરામ ઉવાચ ॥

વરં વૃણિષ્વ ભદ્રં તે યત્તોમનસિ વર્તતે,
ઈતિ વાક્યં ગુરોઃશ્રુત્વા લક્ષ્મણો વાક્યમાદદે.

## ॥ શ્રી લક્ષ્મણ ઉવાચ ॥

યદિ પ્રસન્નો યોગીશ યદિ દેયો વરો મમ,
ત્વદંધ્રિકમલે નિત્યં ભક્તિઃ સ્યાન્મે ભવેભવે.

## ॥ શ્રી સંતરામ ઉવાચ ॥

ભક્તિર્ભવિષ્યતિ તાત દુર્લભાં ચાન્યદેહિનાં,
મયા તે કથિતો યોગઃ સોઽપિ ત્વયિ ભવિષ્યતિ.૧૭

સ્તોત્રેણાનેન માં નિત્યં સ્તોષ્યંતિ ભુવિ યે નરાઃ,
તેષાં કામાન્ પ્રદાસ્યામિ મનોઽભીષ્ટાન્ન સંશયઃ.૧૮

પ્રાતઃકાલે સ્તોત્રમિદં મત્સમીપે વિશેષતઃ,
પઠિત્વા ધનમાપ્નોતિ ધનકામશ્ચ યો નરઃ.૧૯

મધ્યાહ્નેપઠનાત્ નિત્યં પ્રાપ્નુયાત્ પુત્રમુત્તમ્ં,
સાયંકાલે તુ યઃ સ્તોત્રં પઠેત્ ભક્તિપરાયણઃ. ૨૦

યશઃ કીર્તિં ચ વિપુલાં પ્રાપ્નોત્યત્ર ન સંશયઃ,
નિશીથે પઠનાત્ સાધો યોગજ્ઞાનં ભવિષ્યતિ. ૨૧

કૃત્વા પૂજાં ગુરોઃ સમ્યગ્ વાસોલંકારચંદનૈઃ,
ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈઃ રત્નાદ્યૈર્દક્ષિણાદિભિઃ.૨૨

વિતાનૈઃ શ્રેષ્ઠવસ્ત્રૈશ્ચ પાદક્ષાલન પૂર્વકૈઃ,
પઠેદનન્યભાવેન સ પ્રાપ્નોત્યુત્તમાં ગતિમ્.૨૩

**॥ ઈતિ શ્રી અવધૂતેંદ્ર શ્રી સંતરામ-સ્તોત્રમ્ ॥**

**ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ**

## ॥ શ્રી સંતરામસ્તોત્રમ્ ॥

યોગીન્દ્રં વિશ્વવન્દ્યં સકલગુણનિધિં શ્રીયુતં સ્વાત્મનિષ્ઠમ્
ક્લેશાતીતં મમેશં હ્યચલસુખકરં સચ્ચિદાનંદ-રૂપમ્;
શિષ્યાણાં જ્ઞાનદં તં વિગતમલયુતં કિંકરાણાંહૃદિસ્થં
વંદેઽહં સિદ્ધિયુક્તં પરમપદવિદં શ્રી ગુરું સંતરામમ્ ૧

સ્વાત્મજ્ઞં હૃત્સ્થિતં મે વિમલગુરુતરં તીર્થરૂપં પ્રપૂજ્યં,
શાન્તં શ્રી ધર્મતત્ત્વં હ્યખિલમલહરં શ્રી પ્રભૌ લગ્નચિત્તમ્ ;
આશાનાં શોભકં તં વિવિધ સુયશસા મન્યુ દગ્ધં વરિષ્ઠં,
નૌમિ શ્રી સંતરામં ત્વનઘસુવિધુભં વ્યાપકં બોધદંવૈ ૨
અદ્વૈતાનન્દરૂપાત્ પ્રણત જનગણાઽભીષ્ટદં દિવ્યરૂપં ।
યત્સંગાત્પાપતાપાઃ સપદિ હૃદિગતા મે સદાઽજ્ઞાનમૂલાઃ।।
નષ્ટાસ્તં રામરૂપં શરણગતજનક્લેશ-પંચાદિહારમ્।
શ્રોત્રિયં સંતરામં બહુલભવભયઘ્નં જનાનાં ભજેઽહમ્।। ૩

શ્રી સંતરામ ગુરુવર્યમચિન્ત્ય મૂર્તિમ્ ।
હ્યજ્ઞાનકાનનવિનાશન હવ્યવાહમ્ ।।
ઉત્સાહ વર્ધનમહં તુ ચતુઃ ફલાય ।
નમામિ ભક્તિભિરજં તનુવાઙ્મનોભિઃ ।। ૪
અચલ મોક્ષયુતં મમ દૈવતમ્ ।
સકલ શાસ્ત્રરહસ્યવિદં ગુરુમ્ ।।
વિદિતવિશ્વવિભું શિવમીશ્વરમ્ ।
નિખિલ વાદિમતાન્ધ નિવાકરમ્ ।। ૫

અનુપમાગમશાસ્ત્રારતં પરમ્ ।
સુવરદાસ્યમખંડ સુખાસ્પદમ્ ।।
ચરણ ભક્ત ભવાબ્ધિ વિદાહકમ્ ।
પરમપાવનમેવ મનો ભજ ।। ૬
યતો જાયતે પાલ્યતે યેન વિશ્વમ્ ।
જનેભ્યઃ પરં લીયતે યત્ર વિશ્વમ્ ।।
હ્યદાત્તાત્વમસ્યાદિજન્યં વિબોધમ્ ।
ભજે તં ગુરું ચાત્મનસ્તસ્ય યો વૈ ।। ૭

સચ્ચિત્ જ્ઞાનમનન્તમક્ષરમહત્‌દીપ્તિસ્વરૂપં પ્રભુમ્ ।
આનંદમ્ હ્યજમદ્વિતીયમમિતં શ્રી સંતરામં ગુરુમ્ ॥
માયાતીતમપારસત્વગુણગં શાન્તં મહાભારતમ્ ।
કૈવલ્યં પ્રણમામ્યહં કવિવરમ્ શ્રીપાદગંગાફલમ્ ॥ ૮

માયાદિદુઃખૈઃ પરિપીડિતસ્તે ।
પાદાબ્જયો રેણુભિરંકિતોઽહમ્ ॥
શ્વેતધ્વજં સદ્‌ગુરુ સંતરામમ્ ।
વંદેઽમૃતં લક્ષ્મણદાસ-શિષ્યઃ ॥ ૯

ગુરોઃ સ્તોત્રકં યઃ પઠેત્પુણ્યદેહી ।
ગૃહી ભૂપતિર્બ્રહ્મચારી ચ સાધુ ॥
લભેદ્ ધર્મકામાદિ મોક્ષં હિ ભક્ત્યા ।
ગુરોર્વાક્યનિષ્ઠઃ સદા વાઙ્મનોભિઃ ॥ ૧૦

**॥ ઈતિ શ્રી સંતરામ સ્તોત્રં સંપૂર્ણ ॥**

**ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ**

## ॥ શ્રી સંતરામાષ્ટકમ્ ॥

શ્રિયા વિભૂત્યા ચ વિરાજિતં સદા
કપોલકાન્ત્યા સુભગં શુચિસ્મિતમ્ ॥
વિરાજમાનાયત બાહુયુગ્મકં
તં સંતરામં સતતં નતોઽસ્મ્યહમ્ ॥ ૧ ॥
સુખંદદન્તં ભજતાં ચ ભો પ્રભો
નામાનિ રૂપાણિ ચ મંગલાનિ તે ॥

સુખાવતીર્ણં જગતાં હિતાય વૈ
તં સંતરામં સતતં નતોઽસ્મ્યહમ્ ॥ ૨ ॥
દમેન શોચાચમનાદિભિઃ સદા
જિતેન્દ્રિયાન્તઃકરણં યતીશ્વરમ્ ॥
સુનાસિકં પદ્મપલાશલોચનં
તં સંતરામં સતતં નતોઽસ્મ્યહમ્ ॥ ૩ ॥
સ્વકીયકાન્ત્યા બહુધા સુશોભિતમ્
ખલસ્ય શાન્ત્યૈ સ્વજનો દયાય ચ ॥

કૃતાવતારં નયનસ્ય નન્દનં
તં સંતરામં સતતં નતોઽસ્મ્યહમ્ ॥ ૪ ॥
અનાત્મનિ ત્યક્તનિજાભિમાનકં
આત્માવભાસેન પ્રસન્નમાનસમ્ ॥
વિતાયમાનં મનુજેસ્વનુગ્રહં દયાં
તં સંતરામં સતતં નતોઽસ્મ્યહમ્ ॥ ૫ ॥

સુવર્ણમુક્તામણિભિઃ સમન્તતો
વિરોચમાનં મુકુટં ચ મૂર્ધનિ ॥
વિશાલભાલં વિદધન્તમાયતં
તં સંતરામં સતતં નતોઽસ્મ્યહમ્ ॥ ૬ ॥
દિગન્તરવ્યાપ્તમહદ્યશઃ પ્રભું
મનોગતં પ્રાપ્તમનોરથં તથા ॥
અહર્નિશં ધ્યાન પરાયણં ગુરુમ્
તં સંતરામં સતતં નતોઽસ્મ્યહમ્ ॥ ૭ ॥

સ્વયં સ્વશિષ્યાનુપદેશકારિણં
મુદા દ્વિજેભ્યો બહુમાનદાયકમ્ ॥
પૃથ્વીષુ નિત્યં રમમાણમીશ્વરં
તં સંતરામં સતતં નતોઽસ્મ્યમ્ ॥ ૮ ॥
યઃ શુચિઃ પ્રયતઃ પ્રાતઃ સંતરામાષ્ટકં પઠેત્ ।
તસ્ય સર્વાણિ કાર્યાણિ સિધ્યન્તિ મોક્ષમશ્નુતે ॥
॥ ઈતિ શ્રી સંતરામાષ્ટકમ્ ॥

## ॥ શ્રી સંતરામગુરુ પંચકસ્તોત્રમ્ ॥

શ્રીમત્પ્રભું યોગયુતં નિરાશં ।
યોગીન્દ્રવર્યં ચ સુશાન્તચિત્તમ્ ॥
કામાદિમુક્તં ભવસિન્ધુતારં ।
વન્દે સદા શ્રી ગુરુ સંતરામમ્ ॥ ૧ ॥
જ્ઞાનં જનેભ્યઃ શરણાગતેભ્યઃ ।
સનાતનં ભક્તિયુતં ત્વદાદ્યઃ ॥

ધર્માબ્જસૂર્યં ખલુ મોક્ષદં તં ।
વન્દે સદા શ્રી ગુરુ સંતરામમ્ ॥ ૨ ॥
મોક્ષાર્થિભિઃ સેવ્યપદારવિન્દં ।
જીતેન્દ્રિયં શ્રેષ્ઠગુણાલયં ચ ॥
વિવેક વૈરાગ્ય શમાદિયુક્તમ્ ।
વન્દે સદા શ્રી ગુરુ સંતરામમ્ ॥ ૩ ॥
અજ્ઞાનતામિશ્ર દિવાકરં વૈ ।
શ્રી સ્વાત્મનિષ્ટં સુખદં વરેણ્યમ્ ॥

રામસ્વરૂપં કલિદુ:ખહારં ।
વન્દે સદા શ્રી ગુરુ સંતરામમ્ ।। ૪ ।।
મે સૂક્ષ્મદેહસ્ય વિનાશકં તં ।
તીર્થસ્વરૂપં સમદૃષ્ટિયુક્તમ્ ।।
ભક્ત્યા શિર:પ્રાણમનો વચોભિ: ।
વન્દે સદા શ્રી ગુરુ સંતરામમ્ ।। ૫ ।।
।। ઈતિ શ્રી સંતરામ ગુરુ-પંચકસ્તોત્રમ્ ।।

## ॥ શ્રી સંતરામ પ્રાતઃસ્મરણં સ્તોત્રમ્ ॥

નામાનુસાર-ગુણયુક્ત-સુચિત્તવૃત્તિં ।
સિદ્ધ સ્વરૂપમપરોક્ષ સુખાભિલીનમ્ ॥
વિજ્ઞાન મૂર્તિ મતિસૌમ્યમખંડ કાન્તિમ્ ।
શ્રી સંતરામ ગુરૂમીશમહં નમામિ ॥ ૧ ॥
સત્યસ્વરૂપમચલં કરૂણાનિધાનં ।
ધૈર્યાદિસદ્‌ગુણયુતં શુભશાન્તવૃત્તિમ્ ॥

ઉદ્યત્પ્રતાપસહિતં શરણં જનાનામ્ ।
શ્રી સંતરામ ગુરૂમીશમહં નમામિ ।। ૨ ।।
ભક્તોપદેશનિપુણં શુભસુન્દરાસ્યં ।
ચંદ્રપ્રભં સકલસજ્જનમાનનીયમ્ ।।
મોક્ષોપયોગી વચના રચનાભિરામમ્ ।
શ્રી સંતરામ ગુરૂમીશમહં નમામિ ।। ૩ ।।
શ્લોકત્રયમિદં નિત્યં ભક્તાનાં સુખદાયકમ્ ।
યઃ પઠેત્પ્રાતરુત્થાય સર્વપાપૈઃ પ્રમુચ્યતે ।। ૪ ।।

**ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ**

## ॥ શ્રી ગુરુપાદુકાસ્તવન ॥

નાલીકનીંકાશપદાદતાભ્યાં નારી વિમોહાદિનિવારકાભ્યામ્
નમજ્જનાભીષ્ટતતિપ્રદાભ્યાં નમોનમઃ શ્રી ગુરુ પાદુકાભ્યામ્ ૧
શમાદિષટ્કપ્રદવૈભવાભ્યામ્ સમાધિદાનવ્રતદીક્ષિતાભ્યામ્
રમાધવાઙ્ઘ્રિ સ્થિરભક્તિદાભ્યાં નમોનમઃ શ્રી ગુરુપાદુકાભ્યામ્ ૨
નૃપાલિ મૌલિરજરત્નકાન્તિ- સરિદ્વિરાજઝષકન્યકાભ્યામ્
નૃપત્વદાભ્યાંનતલોકપંકતે નમોનમઃ શ્રી ગુરુપાદુકાભ્યામ્ ૩

અનંતસંસાર સમુદ્રતાર-નૌકાયિતાભ્યાં ગુરુભક્તિદાભ્યામ્
વૈરાગ્ય સામ્રાજ્યદપૂજનાભ્યાં નમોનમઃ શ્રી ગુરુપાદુકાભ્યામ્ ૪

પાપાન્ધકારાર્કપરંપરાભ્યાં તાપત્રયાહીન્દ્ર ખગેશ્વરાભ્યામ્
જાડ્યાબ્ધિસંશોષણબાડબાભ્યામ્ નમોનમઃ શ્રી ગુરુપાદુકાભ્યામ્ ૫

કવિત્વવારાશિનિશાકરાભ્યાં દારિદ્રયદાવામ્બુદમાલિકાભ્યામ્
દૂરીકૃતાનમ્રવિપત્તતિભ્યાં નમોનમઃ શ્રી ગુરુપાદુકાભ્યામ્ ૬

નતા યયોઃ શ્રીપતિતાં સમીયુઃ કદાચિદપ્યાશુદરિદ્રવર્યાઃ
મૂકશ્ચવાચસ્પતિતાંહિતાભ્યાં નમોનમઃ શ્રી ગુરુપાદુકાભ્યામ્ ૭

કામાદિ સર્પ વ્રજ ભંજકાભ્યાં વિવેક વૈરાગ્ય નિધિઃપ્રદાભ્યામ્
બોધપ્રદાભ્યાંદ્રુતમોક્ષદાભ્યાં નમોનમઃ શ્રી ગુરુપાદુકાભ્યામ્ ૮

સ્વર્ચાપરાણામખિલેષ્ટદાભ્યાં સ્વાહાસહાયાક્ષધુરંધરાભ્યામ્
સ્વાન્તાચ્છભાવપ્રદપૂજનાભ્યાં નમોનમઃ શ્રી ગુરુપાદુકાભ્યામ્ ૯

# શ્રી કનકધારા સ્તોત્રમ્

અઙ્ગં હરેઃ પુલકભૂષણમાશ્રયન્તી
ભૃઙ્ગાઙ્ગનેવ મુકુલાભરણં તમાલમ્ ।
અઙ્ગીકૃતાખિલવિભૂતિરપાઙ્ગલીલા
માઙ્ગલ્યદાऽસ્તુ મમ મઙ્ગલદેવતાયાઃ ॥૧॥
મુગ્ધા મુહુર્વિદધતી વદને મુરારેઃ
પ્રેમત્રપાપ્રણિહિતાનિ ગતાગતાનિ ।

માલા દશોર્મધુકરીવ મહોત્પલે યા
સા મે શ્રિયં દિશતુ સાગરસમ્ભવાયાઃ ॥૨॥
વિશ્વામરેન્દ્રપદવિભ્રમદાનદક્ષ
માનન્દહેતુરધિકં મુરવિદ્વિષોઽપિ ।
ઈષન્નિષીદતુ મયિ ક્ષણમીક્ષણાર્ધ
મિન્દીવરોદરસહોદરમિન્દિરાયાઃ ॥૩॥

આમીલિતાક્ષમધિગમ્ય મુદા મુકુન્દ
માનન્દકન્દમનિમેષમનઙ્ગતન્ત્રમ્ ।
આકેકરસ્થિતકનીનિકપક્ષ્મનેત્રાં
ભૂત્યૈ ભવેન્મમ ભુજઙ્ગશયાઙ્ગનાયાઃ ॥૪॥
બાહ્વન્તરે મધુજિતઃ શ્રિતકૌસ્તુભે યા
હારાવલીવ હરિનીલમયી વિભાતિ ।

કામપ્રદા ભગવતોડપિ કટાક્ષમાલા
કલ્યાણમાવહતુ મે કમલાલયાયાઃ ।।૫।।
કાલામ્બુદાલિલલિતોરસિ કૈટભારે
ર્ધારાધરે સ્ફુરતિ યા તડિદઙ્ગનેવ ।
માતુઃ સમસ્તજગતાં મહનીયમૂર્તિ
ર્ભદ્રાણિ મે દિશતુ ભાર્ગવનન્દનાયાઃ ।।૬।।

પ્રાપ્તં પદં પ્રથમતઃ કિલ યત્પ્રભાવાન્
માઙ્ગલ્યભાજિ મધુમાથિનિ મન્મથેન ।
મય્યાપતેત્તદિહ મન્થરમીક્ષણાર્ધં
મન્દાલસં ચ મકરાલયકન્યકાયાઃ ॥૭॥
દદ્યાદ્દયાનુપવનો દ્રવિણામ્બુધારા
મસ્મિન્નકિઞ્ચનવિહઙ્ગશિશૌ વિષણ્ણે ।
દુષ્કર્મઘર્મમપનીય ચિરાય દૂરં
નારાયણપ્રણયિનીનયનામ્બુવાહઃ ॥૮॥

ઈષ્ટા વિશિષ્ટમતયોઽપિ યયા દયાર્દ્ર
દૃષ્ટ્યા ત્રિવિષ્ટપપદં સુલભં લભન્તે ।
દૃષ્ટિઃ પ્રહૃષ્ટકમલોદરદીપ્તિરિષ્ટાં
પુષ્ટિં કૃષીષ્ટ મમ પુષ્કરવિષ્ટરાયાઃ ॥૯॥
ગીર્દેવતેતિ ગરુડધ્વજસુન્દરીતિ
શાકમ્ભરીતિ શશિશેખરવલ્લભેતિ ।
સૃષ્ટિસ્થિતિપ્રલયકેલિષુ સંસ્થિતાયૈ
તસ્યૈ નમસ્ત્રિભુવનૈકગુરોસ્તરુણ્યૈ ॥૧૦॥

શ્રુત્યૈ નમોઽસ્તુ શુભકર્મફલપ્રસૂત્યૈ
રત્યૈ નમોઽસ્તુ રમણીયગુણાર્ણવાયૈ ।
શક્ત્યૈ નમોઽસ્તુ શતપત્રનિકેતનાયૈ
પુષ્ટ્યૈ નમોઽસ્તુ પુરુષોત્તમવલ્લભાયૈ ॥૧૧॥
નમોઽસ્તુ નાલીકનિભાનનાયૈ
નમોઽસ્તુ દુગ્ધોદધિજન્મભૂત્યૈ ।
નમોઽસ્તુ સોમામૃતસોદરાયૈ
નમોઽસ્તુ નારાયણવલ્લભાયૈ ॥૧૨॥

સમ્પત્કરાણિ સકલેન્દ્રિયનન્દનાનિ
સામ્રાજ્યદાનવિભવાનિ સરોરુહાક્ષિ ।
ત્વદ્વન્દનાનિ દુરિતાહરણોદ્યતાનિ
મામેવ માતરનિશં કલયન્તુ નાન્યમ્ ॥૧૩॥
યત્કટાક્ષસમુપાસનાવિધિઃ
સેવકસ્ય સકલાર્થસમ્પદઃ ।
સંતનોતિ વચનાઙ્ગમાનસૈ
સ્ત્વાં મુરારિહૃદયેશ્વરીં ભજે ॥૧૪॥

સરસિજનિલયે સરોજહસ્તે
ધવલતમાંશુકગન્ધમાલ્યશોભે ।
ભગવતિ હરિવલ્લભે મનોજ્ઞે
ત્રિભુવનભૂતિકરિ પ્રસીદ મહ્યમ્ ।।૧૫।।
દિગ્ઘસ્તિભિઃ કનકકુમ્ભમુખાવસૃષ્ટ
સ્વર્વાહિનીવિમલચારુજલપ્લુતાઙ્ગીમ્ ।
પ્રાતર્નમામિ જગતાં જનનીમશેષ-
લોકાધિનાથગૃહિણીમમૃતાબ્ધિપુત્રીમ્ ।।૧૬।।

કમલે કમલાક્ષવલ્લભે ત્વં
કરુણાપૂરતરઙ્ગિતૈરપાઙ્ગૈઃ ।
અવલોકય મામકિઞ્ચનાનાં
પ્રથમં પાત્રમકૃત્રિમં દયાયાઃ ॥૧૭॥
સ્તુવન્તિ યે સ્તુતિભિરમૂભિરન્વહં
ત્રયીમયીં ત્રિભુવનમાતરં રમામ્ ।
ગુણાધિકા ગુરુતરભાગ્યભાગિનો
ભવન્તિ તે ભુવિ બુધભાવિતાશયાઃ ॥૧૮॥

# શ્રી સંતરામ સંકટ હરણ સ્ત્રોતમ્

જય જગત કારણ દુઃખ નિવારણ, તરણ તારણ સંત છો.
ઐશ્વર્યવંત અનંત ને, ભગવતં બુદ્ધિમંત છો,
સહુ કષ્ટને હરનાર સુખ કરનાર શાન્તિ પ્રસારજો,
સંકટ હરણ સંતરામ, મારાં સંકટો નિવારજો.

ગુણવાન શક્તિમાન કેરું, સદા શુભ કરનાર છો;
ભવભીડ ભાંગી ભક્તની, ભવનીર તારણહાર છો;
રોગ, રિપુને યાતના, તે સર્વને સંહારજો,
સંકટ હરણ સંતરામ, મારાં સંકટો નિવારજો.

તવ ચરણ અશરણ શરણ છે, અભરા ભરણ વિખ્યાત છો;
વિભુ ધરણ ધરતી હરણ કષ્ટો, સુખકરણ સાક્ષાત છો;
પરિતાપ તારણ દુઃખ નિવારણ, વિપદ ઘન વિદાર જો,
સંકટ હરણ સંતરામ, મારાં સંકટો નિવારજો.

પ્રભુ સર્વ વ્યાપક સ્થિર સ્થાપક, કષ્ટ કાપક ઈશ છો,
મુનિન્દ્ર ઈન્દ્ર ઉપેન્દ્ર, બ્રહ્માદિકમાંહી અધીશ છો,
છો શોક ટાળક જગત પાલક, અરિષ્ટથી ઉગારજો,
સંકટ હરણ સંતરામ, મારાં સંકટો નિવારજો.

પ્રભુ સુખશાતા અભયદાતા, છો વિધાતા જગતના
તાત માતા વિશ્વત્રાતા, શુરભ્રાતા ભક્તના,
હે તાત મારી નમ્ર આ, અભ્યર્થના ઉર ધારજો.
સંકટ હરણ સંતરામ, મારાં સંકટો નિવારજો.

મૃતનેય જીવન આપનાર, પીડા શામક આપ છો,
તાત બ્રહ્મા સૃષ્ટિ સર્જક, વિષ્ણુ પાલક આપ છો,
શિવ છો કલ્યાણ કારી, દત્ત પ્રભુ જય જય હજો
સંકટ હરણ સંતરામ, મારાં સંકટો નિવારજો.

છો શ્રેષ્ઠસંત અનંત મંગલધામ, ને ગુણવંત છો,
સાકાર નિરાકાર જગદાધારને, બળવંત છો,
અમંગલ હરજો સકળને, સર્વ મંગલમય હજો,
સંકટ હરણ સંતરામ, મારાં સંકટો નિવારજો.

## ૬૧

સંત સ્મરણે ભૂત પ્રેત, પિશાચ પિડા જાય છે,
શતવાર કરશે પાઠ તે, ઘર સુખ શાન્તિ થાય છે,
દુસ્તર પ્રભુ સંસાર છે, તો ભવાબ્ધિથી તારજો,
સંકટ હરણ સંતરામ, મારાં સંકટો નિવારજો.

# ॥ શ્રી વિષ્ણુસહસ્ત્રનામસ્તોત્રમ્ ॥

## શ્રી મંગલાચરણ

વિઘ્નેશ્વરાય વરદાય સુરપ્રિયાય
લંબોદરાય સકલાય જગદ્ધિતાય
નાગાનનાય શ્રુતિયજ્ઞ વિભૂષિતાય
ગૌરીસુતાય ગણનાથ નમો નમસ્તે
શાન્તાકારં ભુજગશયનં પદ્મનાભં સુરેશં,
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાંગમ્;

લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગમ્યં,
વન્દે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથમ્

**ૐ નમો ભગવતે વાસુદેવાય**

**શ્રી ગોપાલકૃષ્ણાય નમઃ**

યસ્ય સ્મરણમાત્રેણ જન્મસંસારબંધનાત્ ।
વિમુચ્યતે નમસ્તસ્મૈ વિષ્ણવે પ્રભવિષ્ણવે ।। ૧ ।।
નમઃ સમસ્તભૂતાના-માદિભૂતાય ભૂભૃતે ।
અનેકરૂપરૂપાય વિષ્ણવે પ્રભવિષ્ણવે ।। ૨ ।।

### વૈશંપાયન ઉવાચ

શ્રુત્વા ધર્માનશેષેણ પાવનાનિ ચ સર્વશઃ ।
યુધિષ્ઠિરઃ શાંતનવં પુનરેવાભ્યભાષત ॥ ૩ ॥

### યુધિષ્ઠિર ઉવાચ

કિમેકં દૈવતં લોકે કિં વાપ્યેકં પરાયણમ્ ।
સ્તુવંતઃ કં કમર્ચન્તઃ પ્રાપ્નુયુર્માનવાઃ શુભમ્ ॥ ૪ ॥
કો ધર્મઃ સર્વધર્માણાં ભવતઃ પરમો મતઃ ।
કિં જપન્મુચ્યતે જન્તુ-ર્જન્મસંસારબંધનાત્ ॥ ૫ ॥

## ભીષ્મ ઉવાચ

જગત્પ્રભું દેવદેવમનંતં પુરુષોત્તમમ્ ।
સ્તુવન્નામસહસ્ત્રેણ પુરુષઃ સતતોત્થિતઃ ॥ ૬ ॥
તમેવ ચાર્ચયન્નિત્યં ભક્ત્યા પુરુષમવ્યયમ્ ।
ધ્યાયન્સ્તુવન્નમસ્યંશ્ચ યજમાનસ્તમેવ ચ ॥ ૭ ॥
અનાદિનિધનં વિષ્ણું સર્વલોકમહેશ્વરમ્ ।
લોકાધ્યક્ષં સ્તુવન્નિત્યં સર્વદુઃખાતિગો ભવેત્ ॥ ૮ ॥

બ્રહ્મણ્યં સર્વધર્મજ્ઞં લોકાનાં કીર્તિવર્ધનમ્ ।
લોકનાથં મહદ્ભૂતં સર્વભૂતભવોદ્ભવમ્ ॥ ૯ ॥
એષ મે સર્વધર્માણામ્ ધર્મોऽધિકતમો મતઃ ।
યદ્ભક્ત્યા પુંડરીકાક્ષં સ્તવૈરર્ચેન્નરઃ સદા ॥ ૧૦ ॥
પરમં યો મહત્તેજઃ પરમં યો મહત્તપઃ ।
પરમં યો મહદ્બ્રહ્મ પરમં યઃ પરાયણમ્ ॥ ૧૧ ॥
પવિત્રાણાં પવિત્રં યો, મંગલાનાં ચ મંગલમ્ ।
દૈવતં દૈવતાનાં ચ, ભૂતાનાં યોऽવ્યયઃ પિતા ॥ ૧૨ ॥

યતઃ સર્વાણિ ભૂતાનિ, ભવંત્યાદિયુગાગમે ।
યસ્મિંશ્ચ પ્રલયં યાન્તિ, પુનરેવ યુગક્ષયે ॥ ૧૩ ॥
તસ્ય લોકપ્રધાનસ્ય, જગન્નાથસ્ય ભૂપતે ।
વિષ્ણોર્નામસહસ્ત્રં મે, શ્રૃણુ પાપભયાપહમ્ ॥ ૧૪ ॥
યાનિ નામાનિ ગૌણાનિ, વિખ્યાતાનિ મહાત્મનઃ ।
ઋષિભિઃ પરિગીતાનિ તાનિ વક્ષ્યામિ ભૂતયે ॥ ૧૫ ॥

## ૐ નમો ભગવતે વાસુદેવાય

ૐ વિશ્વં વિષ્ણુર્વષટ્કારો, ભૂતભવ્યભવત્પ્રભુઃ ।
ભૂતકૃદ્ભૂતભૃદ્ભાવો, ભૂતાત્મા ભૂતભાવનઃ ॥ ૧૬ ॥
પૂતાત્મા પરમાત્મા ચ, મુક્તાનાં પરમા ગતિઃ ।
અવ્યયઃ પુરુષઃ સાક્ષી, ક્ષેત્રજ્ઞોઽક્ષર એવ ચ ॥ ૧૭ ॥
યોગો યોગવિદાં નેતા, પ્રધાનપુરુષેશ્વરઃ ।
નારસિંહવપુઃ શ્રીમાન્ કેશવઃ પુરુષોત્તમઃ ॥ ૧૮ ॥

સર્વઃ શર્વઃ શિવઃ સ્થાણુ-ર્ભૂતાદિર્નિધિરવ્યયઃ ।
સંભવો ભાવનો ભર્તા, પ્રભવઃ પ્રભુરીશ્વરઃ ॥ ૧૯ ॥
સ્વયંભૂઃ શંભુરાદિત્યઃ, પુષ્કરાક્ષો મહાસ્વનઃ ।
અનાદિનિધનો ધાતા, વિધાતા ધાતુરુત્તમઃ ॥ ૨૦ ॥
અપ્રમેયો હૃષીકેશઃ, પદ્મનાભોઽમરપ્રભુઃ ।
વિશ્વકર્મા મનુસ્ત્વષ્ટા, સ્થવિષ્ઠઃ સ્થવિરો ધ્રુવઃ ॥ ૨૧ ॥
અગ્રાહ્યઃ શાશ્વતઃ કૃષ્ણો, લોહિતાક્ષઃ પ્રતર્દનઃ ।
પ્રભૂતસ્ત્રિકકુબ્ધામ, પવિત્રં મંગલં પરમ્ ॥ ૨૨ ॥

ઈશાનઃ પ્રાણદઃ પ્રાણોઃ, જ્યેષ્ઠઃ શ્રેષ્ઠઃ પ્રજાપતિઃ ।
હિરણ્યગર્ભો ભૂગર્ભો, માધવો મધુસૂદનઃ ॥ ૨૩ ॥
ઈશ્વરો વિક્રમી ધન્વી, મેધાવી વિક્રમઃ ક્રમઃ ।
અનુત્તમો દુરાધર્ષઃ, કૃતજ્ઞઃ કૃતિરાત્મવાન્ ॥ ૨૪ ॥
સુરેશઃ શરણં શર્મ, વિશ્વરેતાઃ પ્રજાભવઃ ।
અહઃ સંવત્સરો વ્યાલઃ, પ્રત્યયઃ સર્વદર્શનઃ ॥ ૨૫ ॥
અજઃ સર્વેશ્વરઃ સિદ્ધઃ, સિદ્ધિઃ સર્વાદિરચ્યુતઃ ।
વૃષાકપિરમેયાત્મા, સર્વયોગવિનિઃસૃતઃ ॥ ૨૬ ॥

વસુર્વસુમનાઃ સત્યઃ, સમાત્મા સંમિતઃ સમઃ ।
અમોઘઃ પુંડરીકાક્ષો, વૃષકર્મા વૃષાકૃતિઃ ॥ ૨૭ ॥
રુદ્રો બહુશિરા બભ્રુઃ - વિશ્વયોનિઃ શુચિશ્રવાઃ ।
અમૃતઃ શાશ્વતસ્થાણુઃ - વરારોહો મહાતપાઃ ॥ ૨૮ ॥
સર્વગઃ સર્વવિદ્ભાનુઃ - વિશ્વક્સેનો જનાર્દનઃ ।
વેદો વેદવિદવ્યંગો, વેદાંગો વેદવિત્ કવિઃ ॥ ૨૯ ॥
લોકાધ્યક્ષઃ સુરાધ્યક્ષો, ધર્માધ્યક્ષઃ કૃતાકૃતઃ ।
ચતુરાત્મા ચતુર્વ્યૂહઃ ચતુર્દંષ્ટ્રઃચતુર્ભુજઃ ॥ ૩૦ ॥

ભ્રાજિષ્ણુર્ભોજનં ભોક્તા સહિષ્ણુર્જગદાદિજઃ ।
અનઘો વિજયો જેતા વિશ્વયોનિઃ પુનર્વસુઃ ॥ ૩૧ ॥
ઉપેન્દ્રો વામનઃ પ્રાંશુઃ - રમોઘઃ શુચિરૂર્જિતઃ ।
અતીંદ્રઃ સંગ્રહઃ સર્ગો, ધૃતાત્મા નિયમો યમઃ ॥ ૩૨ ॥
વેદ્યો વૈદ્યઃ સદાયોગી, વીરહા માધવો મધુઃ ।
અતીંદ્રિયો મહામાયો, મહોત્સાહો મહાબલઃ ॥ ૩૩ ॥
મહાબુદ્ધિર્મહાવીર્યો, મહાશક્તિર્મહાદ્યુતિઃ ।
અનિર્દેશ્યવપુઃ શ્રીમાન્ અમેયાત્મામહાદ્રિધૃક્ ॥ ૩૪ ॥

મહેષ્વાસો મહીભર્તા, શ્રીનિવાસઃ સતાંગતિઃ ।
અનિરુદ્ધઃ સુરાનંદો ગોવિંદો ગોવિદાંપતિઃ ॥ ૩૫ ॥
મરીચિર્દમનો હંસઃ સુપર્ણો ભુજગોત્તમઃ ।
હિરણ્યનાભઃ સુતપાઃ પદ્મનાભઃ પ્રજાપતિઃ ॥ ૩૬ ॥
અમૃત્યુઃ સર્વદક્સિંહઃ, સંધાતા સંધિમાન્ સ્થિરઃ ।
અજો દુર્મર્ષણઃ શાસ્તા, વિશ્રુતાત્મા સુરારિહા ॥ ૩૭ ॥
ગુરુર્ગુરુતમો ધામઃ સત્યઃ સત્યપરાક્રમઃ ।
નિમિષોડનિમિષઃ-સ્ત્રગ્વી, વાચસ્પતિરુદારધીઃ ॥ ૩૮ ॥

અગ્રણીઃગ્રામણીઃ શ્રીમાન્ ન્યાયો નેતા સમીરણઃ ।
સહસ્ત્રમૂર્ધા વિશ્વાત્મા, સહસ્ત્રાક્ષઃ સહસ્ત્રપાત્ ॥ ૩૯ ॥
આવર્તનો નિવૃત્તાત્મા, સંવૃતઃ સંપ્રમર્દનઃ ।
અહઃ સંવર્તકો વહ્નિ-રનિલો ધરણીધરઃ ॥ ૪૦ ॥
સુપ્રસાદઃ પ્રસનાત્મા, વિશ્વધૃગ્વિશ્વભુગ્વિભુઃ ।
સત્કર્તા સત્કૃતઃ સાધુઃ - જહ્નુર્નારાયણો નરઃ ॥ ૪૧ ॥
અસંખ્યેયોઽપ્રમેયાત્મા, વિશિષ્ટઃ શિષ્ટકૃચ્છુચિઃ ।
સિદ્ધાર્થઃ સિદ્ધસંકલ્પઃ, સિદ્ધિદઃ સિદ્ધિસાધનઃ ॥ ૪૨ ॥

વૃષાહી વૃષભો વિષ્ણુઃ - વૃષપર્વા વૃષોદરઃ ।
વર્ધનો વર્ધમાનશ્ચ, વિવિક્તઃ શ્રુતિસાગરઃ ॥ ૪૩ ॥
સુભુજો દુર્ધરો વાગ્મી, મહેન્દ્રો વસુદો વસુઃ ।
નૈકરૂપો બૃહદ્રૂપઃ, શિપિવિષ્ટઃ પ્રકાશનઃ ॥ ૪૪ ॥
ઓજસ્તેજોદ્યુતિધરઃ પ્રકાશાત્મા પ્રતાપનઃ ।
ઋદ્ધઃ સ્પષ્ટાક્ષરો મંત્રઃ - ચંદ્રાંશુર્ભાસ્કરદ્યુતિઃ ॥ ૪૫ ॥
અમૃતાંશૂદ્ભવો ભાનુઃ, શશબિંદુઃ સુરેશ્વરઃ ।
ઔષધં જગતઃ સેતુઃ, સત્યધર્મપરાક્રમઃ ॥ ૪૬ ॥

ભૂતભવ્યભવન્નાથઃ પવનઃ પાવનોઽનલઃ ।
કામહા કામકૃત્ કાંતઃ, કામઃ કામપ્રદઃ પ્રભુઃ ॥ ૪૭ ॥
યુગાદિકૃદ્યુગાવર્તો, નૈકમાયો મહાશનઃ ।
અદૃશ્યોઽવ્યક્તરૂપશ્ચ, સહસ્ત્રજિદનંતજિત્ ॥ ૪૮ ॥
ઈષ્ટોઽવિશિષ્ટઃ શિષ્ટેષ્ટઃ શિખંડી નહુષો વૃષઃ ।
ક્રોધહા ક્રોધકૃત્કર્તા વિશ્વબાહુર્મહીધરઃ ॥ ૪૯ ॥
અચ્યુતઃ પ્રથિતઃ પ્રાણઃ પ્રાણદો વાસવાનુજઃ ।
અપાં નિધિરધિષ્ઠાન - મપ્રમત્તઃ પ્રતિષ્ઠિતઃ ॥ ૫૦ ॥

સ્કંદઃ સ્કંદધરો ધુર્યો, વરદો વાયુવાહનઃ ।
વાસુદેવો બૃહદ્ભાનુ - રાદિદેવઃ પુરંદરઃ ॥ ૫૧ ॥
અશોકસ્તારણસ્તારઃ, શૂરઃ શૌરિર્જનેશ્વરઃ ।
અનુકૂલઃ શતાવર્તઃ, પદ્મી પદ્મનિભેક્ષણઃ ॥ ૫૨ ॥
પદ્મનાભોઽરવિંદાક્ષઃ, પદ્મગર્ભઃ શરીરભૃત્ ।
મહર્દ્ધિર્ ઋદ્ધો વૃદ્ધાત્મા, મહાક્ષો ગરુડધ્વજઃ ॥ ૫૩ ॥
અતુલઃ શરભો ભીમઃ, સમયજ્ઞો હવિર્હરિઃ ।
સર્વલક્ષણલક્ષણ્યો, લક્ષ્મીવાન્ સમિતિંજયઃ ॥ ૫૪ ॥

વિક્ષરો રોહિતો માર્ગો, હેતુર્દામોદરઃ સહઃ ।
મહીધરો મહાભાગો, વેગવાનમિતાશનઃ ॥ ૫૫ ॥
ઉદ્ભવઃ ક્ષોભણો દેવઃ, શ્રીગર્ભઃ પરમેશ્વરઃ ।
કરણં કારણં કર્તા, વિકર્તા ગહનો ગુહઃ ॥ ૫૬ ॥
વ્યવસાયો વ્યવસ્થાનઃ, સંસ્થાનઃ સ્થાનદો ધ્રુવઃ ।
પરર્દ્ધિઃ પરમસ્પષ્ટઃ - સ્તુષ્ટઃ પુષ્ટઃ શુભેક્ષણઃ ॥ ૫૭ ॥
રામો વિરામો વિરજો, માર્ગો નેયો નયોઽનયઃ ।
વીરઃ શક્તિમતાં શ્રેષ્ઠો, ધર્મો ધર્મવિદુત્તમઃ ॥ ૫૮ ॥

વૈકુંઠઃ પુરુષઃ પ્રાણઃ, પ્રાણદઃ પ્રણવઃ પૃથુઃ ।
હિરણ્યગર્ભઃ શત્રુઘ્નો, વ્યાપ્તો વાયુરધોક્ષજઃ ॥ ૫૯ ॥
ઋતુઃ સુદર્શનઃ કાલઃ, પરમેષ્ઠી પરિગ્રહઃ ।
ઉગ્રઃ સંવત્સરો દક્ષો વિશ્રામો વિશ્વદક્ષિણઃ ॥ ૬૦ ॥
વિસ્તારઃ સ્થાવરઃસ્થાણુઃ, પ્રમાણં બીજમવ્યયમ્ ।
અર્થોઽનર્થો મહાકોશો મહાભોગો મહાધનઃ ॥ ૬૧ ॥
અનિર્વિણ્ણઃ સ્થવિષ્ઠોઽભૂ-ર્ધર્મયૂપો મહામખઃ ।
નક્ષત્રનેમિર્નક્ષત્રી ક્ષમઃ, ક્ષામઃ સમીહનઃ ॥ ૬૨ ॥

યજ્ઞ ઈજ્યો મહેજ્યશ્ચ ક્રતુઃ સત્રં સતાં ગતિઃ ।
સર્વદર્શી વિમુક્તાત્મા સર્વજ્ઞો જ્ઞાનમુત્તમમ્ ॥ ૬૩ ॥
સુવ્રતઃ સુમુખઃ સૂક્ષ્મઃ, સુઘોષઃ સુખદઃ સુહૃત્ ।
મનોહરો જિતક્રોધો, વીરબાહુર્વિદારણઃ ॥ ૬૪ ॥
સ્વાપનઃ સ્વવશો વ્યાપી, નૈકાત્મા નૈકકર્મકૃત્ ।
વત્સરો વત્સલો વત્સી, રત્નગર્ભો ધનેશ્વરઃ ॥ ૬૫ ॥
ધર્મગુબ્ધર્મકૃદ્ધર્મી, સદસત્ક્ષરમક્ષરમ્ ।
અવિજ્ઞાતા સહસ્ત્રાંશુઃ - વિધાતા કૃતલક્ષણઃ ॥ ૬૬ ॥

ગભસ્તિનેમિઃ સત્ત્વસ્થઃ, સિંહો ભૂતમહેશ્વરઃ ।
આદિદેવો મહાદેવો, દેવેશો દેવભૃદ્ગુરુઃ ॥ ૬૭ ॥
ઉત્તરો ગોપતિર્ગોપ્તા, જ્ઞાનગમ્યઃ પુરાતનઃ ।
શરીરભૂતભૃદ્ભોક્તા, કપીંદ્રો ભૂરિદક્ષિણઃ ॥ ૬૮ ॥
સોમપોઽમૃતપઃ સોમઃ, પુરુજિત્પુરુસત્તમઃ ।
વિનયો જયઃ સત્યસંધો, દાશાર્હઃ સાત્વતાંપતિઃ ॥ ૬૯ ॥
જીવો વિનયિતા સાક્ષી, મુકુંદો મિતવિક્રમઃ ।
અંભોનિધિરનંતાત્મા, મહોદધિશયોઽન્તકઃ ॥ ૭૦ ॥

અજો મહાર્હઃ સ્વાભાવ્યો, જિતામિત્રઃ પ્રમોદનઃ ।
આનંદો નંદનો નંદઃ, સત્યધર્મા ત્રિવિક્રમઃ ॥ ૭૧ ॥
મહર્ષિઃ કપિલાચાર્યઃ, કૃતજ્ઞો મેદિનીપતિઃ ।
ત્રિપદસ્ત્રિદશાધ્યક્ષો, મહાશ્રૃંગઃ કૃતાંતકૃત્ ॥ ૭૨ ॥
મહાવરાહો ગોવિંદઃ, સુષેણઃ કનકાંગદી ।
ગુહ્યો ગભીરો ગહનો, ગુપ્તશ્ચક્રગદાધરઃ ॥ ૭૩ ॥
વેધાઃ સ્વાંગોઽજિતઃ કૃષ્ણો, દૃઢઃ સંકર્ષણોઽચ્યુતઃ ।
વરુણો વારુણો વૃક્ષઃ, પુષ્કરાક્ષો મહામનાઃ ॥ ૭૪ ॥

ભગવાન્ ભગહા નંદી, વનમાલી હલાયુધઃ ।
આદિત્યો જ્યોદિરાદિત્યઃ, સહિષ્ણુર્ગતિસત્તમઃ ॥ ૭૫ ॥
સુધન્વા ખંડપરશુ, દર્ારુણો દ્રવિણપ્રદઃ ।
દિવિસ્પૃક્ સર્વદગવ્યાસો વાચસ્પતિરયોનિજઃ ॥ ૭૬॥
ત્રિસામા સામગઃ સામઃ, નિર્વાણં ભેષજં ભિષક્ ।
સંન્યાસકૃચ્છમઃ શાંતો, નિષ્ઠા શાંતિ પરાયણમ્ ॥ ૭૭ ॥
શુભાંગઃ શાંતિદઃ સ્ત્રાષ્ટા, કુમુદઃ કુવલેશયઃ ।
ગોહિતો ગોપતિર્ગોપ્તા, વૃષભાક્ષો વૃષપ્રિયઃ ॥ ૭૮ ॥

અનિવર્તી નિવૃત્તાત્મા, સંક્ષેપ્તા ક્ષેમકૃચ્છિવઃ ।
શ્રીવત્સવક્ષાઃ શ્રીવાસઃ, શ્રીપતિઃ શ્રીમતાંવરઃ ॥ ૭૯ ॥
શ્રીદઃ શ્રીશઃ શ્રીનિવાસઃ શ્રીનિધિઃ શ્રીવિભાવનઃ ।
શ્રીધરઃ શ્રીકરઃ શ્રેયઃ શ્રીમાંલ્લોકત્રયાશ્રયઃ ॥ ૮૦ ॥
સ્વક્ષઃ સ્વંગઃ શતાનંદો, નંદિર્જ્યોતિર્ગણેશ્વરઃ ।
વિજિતાત્માઽવિધેયાત્મા, સત્કીર્તિશ્છિન્નસંશયઃ ॥ ૮૧ ॥
ઉદીર્ણઃ સર્વતશ્ચક્ષુઃ - રનીશઃ શાશ્વતઃસ્થિરઃ ।
ભૂશયો ભૂષણો ભૂતિઃ, વિશોકઃ શોકનાશનઃ ॥ ૮૨ ॥

અર્ચિષ્માનર્ચિતઃ કુંભો, વિશુદ્ધાત્મા વિશોધનઃ ।
અનિરુદ્ધોઽપ્રતિરથઃ પ્રદ્યુમ્નોઽમિતવિક્રમઃ ॥ ૮૩ ॥
કાલનેમિનિહા વીરઃ, શૌરિઃ શૂરજનેશ્વરઃ ।
ત્રિલોકાત્મા ત્રિલોકેશઃ, કેશવઃ કેશિહા હરિઃ ॥ ૮૪ ॥
કામદેવઃ કામપાલઃ, કામી કાંતઃ કૃતાગમઃ ।
અનિર્દેશ્યવપુર્વિષ્ણુઃ, વીરોઽનન્તો ધનંજય ॥ ૮૫ ॥
બ્રહ્મણ્યો બ્રહ્મકૃદ્ બ્રહ્મા, બ્રહ્મ બ્રહ્મવિવર્ધનઃ ।
બ્રહ્મવિદ્ બ્રાહ્મણો બ્રહ્મી, બ્રહ્મજ્ઞો બ્રાહ્મણપ્રિયઃ ॥ ૮૬ ॥

મહાક્રમો મહાકર્મા, મહાતેજા મહોરગઃ ।
મહાક્રતુર્મહાયજ્વા, મહાયજ્ઞો મહાહવિઃ ॥ ૮૭ ॥
સ્તવ્યઃ સ્તવપ્રિયઃ સ્તોત્રં, સ્તુતિઃ સ્તોતારણપ્રિયઃ ।
પૂર્ણ પૂરયિતા પુણ્યઃ, પુણ્યકીર્તિરનામયઃ ॥ ૮૮ ॥
મનોજવસ્તીર્થકરો, વસુરેતા વસુપ્રદઃ ।
વસુપ્રદો વાસુદેવો, વસુર્વસુમના હવિઃ ॥ ૮૯ ॥
સદ્‌ગતિઃ સત્કૃતિઃ સત્તા, સદભૂતિઃ સત્પરાયણઃ ।
શૂરસેનો યદુશ્રેષ્ઠઃ, સન્નિવાસઃ સુયામુનઃ ॥ ૯૦ ॥

ભૂતાવાસો વાસુદેવઃ, સર્વાસુનિલયોઽનલઃ ।
દર્પહા દર્પદો દપ્તો, દુર્ધરોઽથાપરાજિતઃ ॥ ૯૧ ॥
વિશ્વમૂર્તિર્મહામૂર્તિઃ, દીપ્તમૂર્તિરમૂર્તિમાન્ ।
અનેકમૂર્તિરવ્યક્તઃ, શતમૂર્તિઃ શતાનનઃ ॥ ૯૨ ॥
એકો નૈકઃ સવઃ કઃ કિં, યત્તત્પદમનુત્તમમ્ ।
લોકબન્ધુર્લોકનાથો, માધવો ભક્તવત્સલઃ ॥ ૯૩ ॥
સુવર્ણવર્ણો હેમાંગો, વરાંગશ્ચંદનાંગદી ।
વીરહા વિષમઃ શૂન્યો, ધૃતાશીરચલશ્ચલઃ ॥ ૯૪ ॥

અમાની માનદો માન્યો, લોકસ્વામી ત્રિલોકધૃક્ ।
સુમેધા મેધજો ધન્યઃ, સત્યમેધા ધરાધરઃ ॥ ૯૫ ॥
તેજોવૃષો દ્યુતિધરઃ, સર્વશસ્ત્રભૃતાંવરઃ ।
પ્રગ્રહો નિગ્રહો વ્યગ્રો, નૈકશૃંગો ગદાગ્રજઃ ॥ ૯૬ ॥
ચતુર્મૂર્તિશ્ચતુર્બાહુઃ - ચતુર્વ્યૂહશ્ચતુર્ગતિઃ ।
ચતુરાત્મા ચતુર્ભાવઃ, ચતુર્વેદવિદેકપાત્ ॥ ૯૭ ॥
સમાવર્તોઽનિવૃત્તાત્મા, દુર્જયો દુરતિક્રમઃ ।
દુર્લભો દુર્ગમો દુર્ગો, દુરાવાસો દુરારિહા ॥ ૯૮ ॥

શુભાંગો લોકસારંગઃ, સુતંતુસ્તંતુવર્ધનઃ ।
ઈન્દ્રકર્મા મહાકર્મા, કૃતકર્મા કૃતાગમઃ ॥ ૯૯ ॥
ઉદ્ભવઃ સુંદરઃ સુંદો, રત્નનાભઃ સુલોચનઃ ।
અર્કો વાજસનઃ શૃંગી, જયંતઃ સર્વવિજ્જયી ॥ ૧૦૦ ॥
સુવર્ણબિંદુરક્ષોભ્યઃ, સર્વવાગીશ્વરેશ્વરઃ ।
મહાહ્રદો મહાગર્તો, મહાભૂતો મહાનિધિઃ ॥ ૧૦૧ ॥
કુમુદઃ કુંદરઃ કુંદઃ, પર્જન્યઃ પાવનોડનિલઃ ।
અમૃતાશોડમૃતવપુઃ, સર્વજ્ઞઃ સર્વતોમુખઃ ॥ ૧૦૨ ॥

સુલભઃ સુવ્રતઃ સિદ્ધઃ, શત્રુજિચ્છત્રુતાપનઃ ।
ન્યગ્રોધોદુંબરોઽશ્વત્થઃ, શ્વાણૂરાંધ્રનિષૂદનઃ ॥ ૧૦૩ ॥
સહસ્ત્રાર્ચિઃ સપ્તજિહ્‌વઃ સપ્તૈધાઃ સપ્તવાહનઃ ।
અમૂર્તિરનઘોઽચિંત્યો, ભયકૃદ્‌ ભયનાશનઃ ॥ ૧૦૪ ॥
અણુર્બૃહત્કૃશઃ સ્થૂલો, ગુણભૃન્નિર્ગુણો મહાન્‌ ।
અધૃતઃ સ્વધૃતઃ સ્વાસ્યઃ, પ્રાગ્વંશો વંશવર્ધનઃ ॥ ૧૦૫ ॥
ભારભૃત્‌ કથિતો યોગી, યોગીશઃ સર્વકામદઃ ।
આશ્રમઃ શ્રમણઃ ક્ષામઃ, સુપર્ણો વાયુવાહનઃ ॥ ૧૦૬ ॥

ધનુર્ધરો ધનુર્વેદો, દંડો દમયિતા દમઃ ।
અપરાજિતઃ સર્વસહો, નિયંતા નિયમો યમઃ ॥ ૧૦૭ ॥
સત્વવાન્ સાત્વિકઃ સત્યઃ સત્યધર્મપરાયણઃ ।
અભિપ્રાયઃ પ્રિયાર્હોઽર્હઃ, પ્રિયકૃત્ પ્રીતિવર્ધનઃ ॥ ૧૦૮ ॥
વિહાયસગતિર્જ્યોતિઃ સુરુચિર્હુતભુગ્વિભુઃ ।
રવિર્વિરોચનઃ સૂર્યઃ, સવિતા રવિલોચનઃ ॥ ૧૦૯ ॥
અનંતો હુતભુગ્ભોક્તા, સુખદો નૈકજોઽગ્રજઃ ।
અનિર્વિણ્ણઃ સદામર્ષી, લોકાધિષ્ઠાનમદ્ભુતઃ ॥ ૧૦૦ ॥

સનાત્સનાતનતમઃ, કપિલઃ કપિરવ્યયઃ ।
સ્વસ્તિદ સ્વસ્તિકૃત્સ્વસ્તિઃ સ્વસ્તિભુક્સ્વસ્તિદક્ષિણઃ ॥ ૧૧૧ ॥
અરૌદ્રઃ કુંડલી ચક્રી, વિક્રમ્યૂર્જિતશાસનઃ ।
શબ્દાતિગઃ શબ્દસહઃ, શિશિરઃ શર્વરીકરઃ ॥ ૧૧૨ ॥
અક્રૂર પેશલો દક્ષો, દક્ષિણઃ ક્ષમિણાંવરઃ ।
વિદ્વત્તમો વીતભયઃ, પુણ્યશ્રવણકીર્તનઃ ॥ ૧૧૩ ॥
ઉત્તારણો દુષ્કૃતિહા, પુણ્યો દુઃસ્વપ્નનાશનઃ ।
વીરહા રક્ષણઃ સંતો, જીવનઃ પર્યવસ્થિતઃ ॥ ૧૧૪ ॥

અનંતરૂપોઽનંતશ્રી - ર્જીતમન્યુર્ભયાપહઃ ।
ચતુરસ્ત્રો ગભીરાત્મા, વિદિશો વ્યાદિશો દિશ ॥ ૧૧૫ ॥
અનાદિઃભૂર્ભુવો લક્ષ્મીઃ, સુવીરો રુચિરાંગદઃ ।
જનનો જનજન્માદિઃ, ભીમો ભીમ પરાક્રમઃ ॥ ૧૧૬ ॥
આધારનિલયો ધાતા, પુષ્પહાસઃ પ્રજાગરઃ ।
ઊર્ધ્વગઃ સત્પથાચારઃ પ્રાણદઃ પ્રણવઃ પણઃ ॥ ૧૧૭ ॥
પ્રમાણં પ્રાણનિલયઃ, પ્રાણભૃત્ પ્રાણજીવનઃ ।
તત્ત્વં તત્ત્વવિદેકાત્મા, જન્મમૃત્યુજરાતિગઃ ॥ ૧૧૮ ॥

ભૂર્ભુવઃ સ્વસ્તરુસ્તારઃ, સવિતા પ્રપિતામહઃ ।
યજ્ઞો યજ્ઞપતિર્યજ્વા, યજ્ઞાંગો યજ્ઞવાહનઃ ॥ ૧૧૯ ॥
યજ્ઞભૃદ્ યજ્ઞકૃદ્ યજ્ઞી, યજ્ઞભુગ્યસાધનઃ ।
યજ્ઞાંતકૃદ્ યજ્ઞગુહ્ય, મન્નમન્નાદ એવ ચ ॥ ૧૨૦ ॥
આત્મયોનિઃ સ્વયંજાતો, વૈખાનઃ સામગાયનઃ ।
દેવકીનંદન સ્ત્રાષ્ટા, ક્ષિતીશઃ પાપનાશનઃ ॥ ૧૨૧ ॥
શંખભૃન્નંદકી ચક્રી, શાડર્ગધન્વા ગદાધરઃ ।
રથાંગપાણિરક્ષોભ્યઃ સર્વપ્રહરણાયુધઃ ॥ ૧૨૨ ॥

**॥ સર્વ પ્રહરણાયુધઃ ૐ નમઃ ઈતિ ॥**

ઈતીદં કીર્તનીયસ્ય, કેશવસ્ય મહાત્મનઃ ।
નામ્નાં સહસ્ત્રં દિવ્યાના-મશેષેણ પ્રકીર્તિતમ્ ॥ ૧૨૩ ॥
ય ઈદં શ્રૃણુયાન્નિત્યં યશ્ચાપિ પરિકીર્તયેત્ ।
નાશુભં પ્રાપ્નુયાત્ કિંચિત્ સોઽમુત્રેહ ચ માનવઃ ॥ ૧૨૪ ॥
વેદાન્તગો બ્રાહ્મણઃસ્યાત્ ક્ષત્રિયો વિજયીભવેત્ ।
વૈશ્યો ધનસમૃદ્ધઃ સ્યાચ્છૂદ્રઃ સુખમવાપ્નુયાત્ ॥ ૧૨૫ ॥

ધર્માર્થીપ્રાપ્નુયાદ્ ધર્મ-મર્થાર્થી ચાર્થમાપ્નુયાત્ ।
કામાનવાપ્નુયાત્ કામી - પ્રજાર્થીપ્રાપ્નુયાત્ પ્રજામ્ ॥ ૧૨૬ ॥
ભક્તિમાન્ યઃ સદોત્થાય શુચિસ્તદ્ગતમાનસઃ ।
સહસ્ત્રં વાસુદેવસ્ય નામ્નામેતત્ પ્રકીર્તયેત્ ॥ ૧૨૭ ॥
યશઃ પ્રાપ્નોતિ વિપુલં જ્ઞાતિપ્રાધાન્યમેવ ચ ।
અચલાં શ્રિયમાપ્નોતિ શ્રેયઃ પ્રાપ્નોત્યનુત્તમમ્ ॥ ૧૨૮ ॥
ન ભયં ક્વચિદાપ્નોતિ, વીર્યં તેજશ્ચવિંદતિ ।
ભવત્યરોગો દ્યુતિમાન્ બલરૂપગુણાન્વિતઃ ॥ ૧૨૯ ॥

રોગાર્તોમુચ્યતે રોગાદ્, બદ્ધો મુચ્યેતબન્ધનાત્ ।
ભયાન્મુચ્યેત ભીતસ્તુ, મુચ્યેતાપન્નઆપદઃ ॥ ૧૩૦ ॥
દુર્ગાણ્યતિતરત્યાશુ, પુરુષઃ પુરુષોત્તમમ્ ।
સ્તુવન્નામસહસ્ત્રેણ, નિત્યં ભક્તિસમન્વિતઃ ॥ ૧૩૧ ॥
વાસુદેવાશ્રયો મર્ત્યો, વાસુદેવપરાયણઃ ।
સર્વપાપવિશુદ્ધાત્મા, યાતિ બ્રહ્મસનાતનમ્ ॥ ૧૩૨ ॥
ન વાસુદેવભક્તાનામ્, અશુભં વિદ્યતે ક્વચિત્ ।
જન્મમૃત્યુજરાવ્યાધિ ભયં નૈવોપજાયતે ॥ ૧૩૩ ॥

ઈમં સ્તવમધીયાનઃ, શ્રદ્ધાભક્તિસમન્વિતઃ ।
યુજ્યેતાત્મસુખક્ષાન્તિ, શ્રીધૃતિસ્મૃતિકીર્તિભિઃ ।। ૧૩૪ ।।
નક્રોધો ન ચ માત્સર્યં, ન લોભો નાશુભામતિઃ ।
ભવન્તિ કૃતપુણ્યાનાં, ભક્તાનાં પુરુષોત્તમે ।। ૧૩૫ ।।
દ્યૌઃ સચન્દ્રાર્ક નક્ષત્રા, ખં દિશો ભૂર્મહોદધિઃ ।
વાસુદેવસ્ય વીર્યેણ, વિધૃતાનિ મહાત્મનઃ ।। ૧૩૬ ।।
સસુરાસુરગન્ધર્વં, સયક્ષોરગરાક્ષસમ્ ।
જગદ્વશે વર્તતેદં, કૃષ્ણસ્ય સચરાચરમ્ ।। ૧૩૭ ।।

ઈન્દ્રિયાણિ મનો બુદ્ધિઃ, સત્ત્વં તેજો બલંધૃતિઃ ।
વાસુદેવાત્મકાન્યાહુઃ, ક્ષેત્રં ક્ષેત્રજ્ઞ એવ ચ ॥ ૧૩૮ ॥
સર્વાગમાનામાચારઃ, પ્રથમં પરિકલ્પતે ।
આચારપ્રભવો ધર્મો, ધર્મસ્ય પ્રભુરચ્યુતઃ ॥ ૧૩૯ ॥
ઋષયઃ પિતરો દેવા, મહાભૂતાનિ ધાતવઃ ।
જંગમાજંગમં ચેદં, જગન્નારાયણોદ્ભવમ્ ॥ ૧૪૦ ॥
યોગોજ્ઞાનં તથા સાંખ્યં, વિદ્યાઃ શિલ્પાદિકર્મ ચ ।
વેદાઃ શાસ્ત્રાણિ વિજ્ઞાન-મેતત્સર્વં જનાર્દનાત્ ॥ ૧૪૧ ॥

એકો વિષ્ણુર્મહદ્ભૂતં, પૃથગ્ ભૂતાન્યનેકશઃ ।
ત્રીલ્લોકાન્ વ્યાપ્ય ભૂતાત્મા, ભુંક્તે વિશ્વભુગવ્યયઃ ॥ ૧૪૨ ॥
ઈમં સ્તવં ભગવતો, વિષ્ણોર્વ્યાસેન કીર્તિતમ્ ।
પઠેદ્ય ઈચ્છેત્પુરુષઃ શ્રેયઃ પ્રાપ્તુંસુખાનિ ચ ॥ ૧૪૩ ॥
વિશ્વેશ્વરમજં દેવં, જગતઃ પ્રભવાપ્યયમ્ ।
ભજન્તિ યે પુષ્કરાક્ષં, ન તે યાન્તિ પરાભવમ્ ॥ ૧૪૪ ॥

**અર્જુન ઉવાચ**

પદ્મપત્રવિશાલાક્ષ, પદ્મનાભ સુરોત્તમ ।

ભક્તાનામનુરક્તાનાં, ત્રાતા ભવ જનાર્દન ॥ ૧૪૫ ॥

**શ્રી ભગવાન ઉવાચ**

યો માં નામસહસ્ત્રેણ, સ્તોતુમિચ્છતિ પાંડવ ।
સોઽહમેકેન શ્લોકેન, સ્તુત એવ ન સંશયઃ ॥ ૧૪૬ ॥
નમોઽસ્ત્વનંતાય સહસ્ત્રમૂર્તયે,
સહસ્ત્રપાદાક્ષિશિરોરુબાહવે ।
સહસ્ત્રનામ્ને પુરુષાય શાશ્વતે,
સહસ્ત્ર કોટિ યુગધારિણે નમઃ ॥ ૧૪૭ ॥

નમઃ કમલનાભાય, નમસ્તે જલશાયિને ।
નમસ્તે કેશવાનંત, વાસુદેવ નમોઽસ્તુ તે ॥ ૧૪૮ ॥
વાસનાદ્વાસુદેવસ્ય, વાસિતં ભુવનત્રયમ્ ।
સર્વભૂતનિવાસોઽસિ, વાસુદેવ નમોઽસ્તુ તે ॥ ૧૪૯ ॥
નમો બ્રહ્મણ્યદેવાય, ગો-બ્રાહ્મણહિતાય ચ ।
જગદ્ધિતાય કૃષ્ણાય, ગોવિંદાય નમો નમઃ ॥ ૧૫૦ ॥
આકાશાત્પતિતં તોયં, યથા ગચ્છતિ સાગરમ્ ।
સર્વદેવનમસ્કારઃ, કેશવં પ્રતિ ગચ્છતિ ॥ ૧૫૧ ॥

એષ નિષ્કંટકઃ પંથા, યત્ર સંપૂજ્યતે હરિઃ ।
કુપથં તં વિજાનીયાદ્, ગોવિંદરહિતાગમમ્ ॥ ૧૫૨ ॥
સર્વવેદેષુ યત્પુણ્યં, સર્વતીર્થેષુ યત્ફલમ્ ।
તત્ ફલં સમવાપ્નોતિ, સ્તુત્વા દેવં જનાર્દનમ્ ॥ ૧૫૩ ॥
યો નરઃ પઠતે નિત્યં, ત્રિકાલં કેશવાલયે ।
દ્વિકાલમેકકાલં વા, ક્રૂરં સર્વં વ્યપોહતિ ॥ ૧૫૪ ॥
દહ્યં તે રિપવસ્તસ્ય, સૌમ્યાઃ સર્વે સદા ગ્રહાઃ ।
વિલીયંતે ચ પાપાનિ, સ્તવે હ્યસ્મિન્ પ્રકીર્તિતે ॥ ૧૫૫ ॥

યેન ધ્યાતઃ શ્રુતો યેન, યેનાયં પઠ્યતે સ્તવઃ ।
દત્તાનિ સર્વદાનાનિ, સુરાઃ સર્વે સમર્ચિતાઃ ॥ ૧૫૬ ॥
ઈહલોકે પરે વાપિ, નભયં વિદ્યતે ક્વચિત્ ।
નામ્નાં સહ્સ્ત્રં યોડધીતે, દ્વાદશ્યાં મમ સન્નિધૌ ॥ ૧૫૭ ॥
શનૈર્દહતિ પાપાનિ કલ્પકોટિશતાનિ ચ ।
અશ્વત્થસન્નિધૌ પાર્થઃ તુલસીસન્નિધૌ તથા ॥ ૧૫૮ ॥
પઠેન્નામસહસ્ત્રં તુ, ગવાં કોટિફલં લભેત્ ।
શિવાલયે પઠેન્નિત્યં, તુલસીવનસંસ્થિતઃ ॥ ૧૫૯ ॥

નરો મુક્તિમવાપ્નોતિ ચક્રપાણેર્વચો યથા ।
બ્રહ્મહત્યાદિકં ઘોરં, સર્વપાપં વિનશ્યતિ ।। ૧૬૦ ।।
વનમાલી ગદી શાંર્ગી, શંખી ચક્રી ચ નંદકી ।
શ્રીમાન્નારાયણો વિષ્ણુઃ, વાસુદેવોઽભીરક્ષતુ ।। ૧૬૧ ।।

**।। ઈતિ શ્રીમન્મહાભારતે શતસહસ્ત્રાયાં સંહિતાયાં વૈયાસિક્યામાનુશાસનિકે પર્વણિ દાનધર્મે ભીષ્મયુધિષ્ઠિર સંવાદે શ્રી વિષ્ણોર્દિવ્યસહસ્ત્રનામસ્તોત્રં સંપૂર્ણમ્ ।।**

## ॥ અથ શ્રી શિવમહિમ્નઃસ્તોત્રમ્ ॥

### શ્રી ગણેશાય નમઃ

ગજાનનં ભૂતગણાધિસેવિતં, કપિત્થજમ્બૂફલચારુભક્ષણમ્
ઉમાસુતં શોકવિનાશકારકં, નમામિ વિઘ્નેશ્વરપાદપંકજમ્

### શ્રી પુષ્પદન્ત ઉવાચ

મહિમ્નઃ પારં તે પરમવિદુષો યદ્યસદશી
સ્તુતિર્બ્રહ્માદીનામપિ તદવસન્નાસ્ત્વયિ ગિરઃ

અથાવાચ્યઃ સર્વઃ સ્વમતિપરિણામાવધિ ગૃણન્
મમાપ્યેષ સ્તોત્રે હર નિરપવાદઃ પરિકરઃ ૧
અતીતઃ પંથાનં, તવ ચ મહિમા વાઙ્મનસયો-
રતદ્વ્યાવૃત્ત્યા યં ચકિતમભિધત્તે શ્રુતિરપિ
સ કસ્ય સ્તોતવ્યઃ કતિવિધગુણઃ કસ્ય વિષયઃ
પદે ત્વર્વાચીને પતતિ ન મનઃ કસ્ય ન વચઃ ૨
મધુસ્ફીતા વાચઃ પરમમમૃતં નિર્મિતવત-
સ્તવ બ્રહ્મન્ કિં વાગપિ સુરગુરોર્વિસ્મયપદમ્

મમ ત્વેતાં વાણીં ગુણકથનપુણ્યેન ભવતઃ
પુનામીત્યર્થેઽસ્મિન્પુરમથન! બુદ્ધિર્વ્યવસિતા ૩
તવૈશ્વર્યં યત્તજ્જગદુદયરક્ષાપ્રલયકૃત્
ત્રયીવસ્તુ વ્યસ્તં તિસૃષુ ગુણભિન્નાસુ તનુષુ
અભવ્યાનામસ્મિન્ વરદ રમણીયામરમણીં
વિહન્તું વ્યાક્રોશીં વિદધત ઈહૈકે જડધિયઃ ૪
કિમીહઃ કિંકાયઃ સ ખલુ કિમુપાયસ્ત્રિભુવનં
કિમાધારો ધાતા સૃજતિ કિમુપાદાન ઈતિ ચ

અતર્ક્યૈશ્વર્યે ત્વય્યનવસરદુઃસ્થો હતધિયઃ
કુતર્કોઽયં કાંશ્ચિન્મુખરયતિ મોહાય જગતઃ ૫
અજન્માનો લોકાઃ કિમવયવવન્તોઽપિ જગતા-
મધિષ્ઠાતારં કિં ભવવિધિરનાદૃત્ય ભવતિ
અનીશો વા કુર્યાદ્ ભુવનજનને કઃ પરિકરો
યતો મંદાસ્ત્વાં પ્રત્યમરવર! સંશેરત ઈમે ૬
ત્રયી સાંખ્યં યોગઃ પશુપતિમતં વૈષ્ણવમિતિ
પ્રભિન્ને પ્રસ્થાને પરમિદમદઃ પથ્યમિતિ ચ

રુચીનાં વૈચિત્ર્યાદૃજુકુટિલ નાનાપથજુષાં
નૃણામેકો ગમ્યસ્ત્વમસિ પયસામર્ણવ ઈવ ૭
મહોક્ષઃ ખટ્વાઙ્ગં પરશુરજિનં ભસ્મ ફણિનઃ
કપાલં ચેતીયત્તવ વરદ તન્ત્રોપકરણમ્
સુરાસ્તાં તામૃદ્ધિં દધતિ તુ ભવદ્ભ્રૂપ્રણિહિતાં
ન હિ સ્વાત્મારામં વિષયમૃગતૃષ્ણા ભ્રમયતિ ૮
ધ્રુવં કશ્ચિત્સર્વં સકલમપરસ્ત્વધ્રુવમિદં
પરો ધ્રૌવ્યાધ્રૌવ્યે જગતિ ગદતિ વ્યસ્તવિષયે

સમસ્તેઽપ્યેતસ્મિન્ પુરમથન્ તૈર્વિસ્મિત ઈવ
સ્તુવન્ જિહ્રેમિ ત્વાં ન ખલુ નનુ ધૃષ્ટા મુખરતા ૯
તવૈશ્ચર્યં યત્નાદ્યદુપરિ વિરંચિર્હરિરધઃ
પરિચ્છેત્તું યાતાવનલમનલસ્કંધવપુષઃ
તતો ભક્તિશ્રદ્ધાભરગુરુગૃણદ્ભ્યાં ગિરિશ યત્
સ્વયં તસ્થે તાભ્યાં તવ કિમનુવૃત્તિર્ન ફલતિ ૧૦
અયત્નાદાપાદ્ય ત્રિભુવનમવૈરવ્યતિકરં
દશાસ્યો યદ્બાહૂનભૃત રણકંડૂપરવશાન્

શિરઃ પદ્મશ્રેણીરચિતચરણાંભોરુહબલેઃ
સ્થિરાયાસ્ત્વદ્ભક્તેસ્ત્રિપુરહર વિસ્ફુર્જિતમિદમ્ ૧૧
અમુષ્ય ત્વત્સેવાસમધિગતસારં ભુજવનં
બલાત્કૈલાસેડપિ ત્વદધિવસતૌ વિક્રમયતઃ
અલભ્યા પાતાલેડપ્યલસચિલતાંગુષ્ઠશિરસિ
પ્રતિષ્ઠા ત્વય્યાસીદ્ ધ્રુવમુપચિતો મુહ્યતિ ખલઃ ૧૨
